Sudarshan Research Journal
Volume – 2, Issue - 12, December-2024
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

# भारतीयदर्शनेषु योगशास्त्रस्य वैशिष्ट्यम्

**बिप्लब सरकार**
न्यायविभागः (शोधच्छात्रः)
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालयस्य, (केन्द्रीयविश्वविद्यालयस्य)

---

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन अर्जुनं प्रति कर्त्तव्यनिष्ठकर्मप्रतिपादनवशेन योगस्य महत्वं उक्तम् -

**"योगस्थः कुरु कर्माणि सङ्ग त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते[1]॥"**

न केवलं योगः शरीरेन्द्रियशुद्धेः कारणम्, न केवलं योगः आत्मोन्नतेर्वा कारणम्, किन्तु कर्मसम्पादनकौशलमपि शिक्षयति योगः। यदुक्तं भगवता श्रीकृष्णेन-

**"बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**
**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्[2]॥"**

योगशास्त्रोक्तसाधनानि ये संसाधयन्ति ते योगिनः सर्वदा आत्मोन्नत्या सह ईश्वरसाक्षात्कारेण निमग्ना भवन्ति। तदा ईश्वरप्रणिधानात् कैवल्यप्राप्तुमपि समर्थाः भवन्ति ते। योगिनः शुद्धान्तःकरणेन ईश्वरस्य सत्तामनुभूयन्ते। यदुक्तम्-

**"यदाऽऽत्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्।**
**अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः[3]॥"**

---

[1] श्री.भ.गी.अ.२.लो.४८
[2] श्री.भ.गी.ब.२.वो.५०
[3] श्वेता.उप.२.१५

मानविकमूल्यवोधप्रतिपादकेषु शास्त्रेषु श्रीमद्भगवद्गीतायाः महत्वं सुविदितम्। तत्रापि प्रतिपादितेषु विषयेषु ज्ञानयोगः कर्मयोगः भक्तियोगश्च त्रयो मोक्षरूपमहत्वाकांक्षां परिपूरयन्ति। एतेषां त्रयाणां योगानां संसाधने योगिनः भूमिका सर्वोपरि विद्यते। अतएव योगिनः प्रशंसा भगवता श्रीकृष्णेन प्रतिपादिता। तद्यथा-

**"तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपिमतोऽधिकः।**
**कर्मिभ्यश्चाधिको योगी तस्मादयोगी भवार्जुनः॥"[4]**

श्रीमद्भागवतमहापुराणे भगवता श्रीकृष्णेन उद्धवं प्रति योगस्य महत्वं प्रतिपादितम्। तेन उपायत्रयेण योगस्वरूपं प्रतिपादितम्। तद्यथा-

**"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।**
**ज्ञानं कर्म च भक्तिश्च नोपायोन्योऽस्ति कुत्रचित्॥"[5]**

संसारेऽस्मिन् विरक्तानां ज्ञानयोगे प्रवृत्तिः दृश्यते, संसारासक्तानां कर्मयोगे प्रवृत्तिर्दृश्यते, उभयरहितानां च भक्तियोगे एवाधिकार इति भागवतपुराणस्य अभिव्यक्तिः। तद्यथा -

**"निर्विण्णानां ज्ञानयोगे न्यासिनामिह कर्मसु।**
**तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्॥"**
**"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।**
**न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥"[6]**

मानविकमूल्यबोधोवगमयितुं अध्यात्ममार्गेण जीवननिर्वाहं कर्त्तव्यम्। परन्तु अध्यात्ममार्गो

---
[4] श्री.भ.गी.६.४६
[5] भा.पु.११.२०.६
[6] मा.पु.११.२०-७-८

दुर्गमसदृशः कष्टसाध्यः । यदुक्तं कठोपनिषदि -

**"उतिष्ठत जाग्रत प्राप्यवरान्निवोधत**

**क्षुरस्थ धारा निशिता दुरत्यया दुर्गपथस्तत्कवयो वदन्ति।।"[7]**

योगस्य महत्वमेवमुच्यते कठोपनिषदि अध्यात्मयोगवलेन प्रकाशस्वरूपविशिष्टमात्मस्वरूपं ज्ञात्वा धीरपुरुषः हर्षशोकौ जहाति । तत्रोच्यते-

**"तं दुदर्श गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**

**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥"[8]**

तत्राप्युपपादितमस्ति यत् पञ्चज्ञानेन्द्रियैः सह मनसः बुद्धेश्च स्थिरताद्वारा विषयदर्शनरूपप्रमादरहितः साधकः निरन्तरयोगाभ्यासेन परमगतिमधिगच्छति। अतएवोच्यते-

**"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**

**बुद्धिश्च न विचेष्टति तमाहुः परमां गतिम्॥"**

**"तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**

**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥"[9]**

**'अध्यात्मविद्याविद्यानामिति'**[10] श्रीमद्भगवद्गीतावचनानुसारं भारतीयददर्शनशास्त्राणि विद्यास्वरूपं प्रतिपादयन्ति। यद्यपि दुःखनिवृत्तिः नित्यसुखप्राप्तिश्चात्मसाक्षात्काररूपेण सांख्य-न्याय-मीमांसा-वेदान्तादि दर्शनानां सम्मतिरस्ति, तथापि योगदर्शनस्य किं वैशिष्ट्यमिति जिज्ञासायामुच्यते इन्द्रियनिग्रहपुरःसरम् आत्मबलजागरयितुं आत्मसाक्षात्कारस्योपायः तत्रैव प्रतिपादितोऽस्ति। एतदेव योगशास्त्रस्य वैशिष्ट्यम्। भगवता श्रीकृष्णेन गीतायाम् प्रतिपादितम्-

---

[7] कठ.उप.१.३.१४

[8] कठ.उप.१.२.१२

[9] कठ.उप. २.३.१०-११

[10] गीता-१०/३२

Sudarshan Research Journal
Volume – 2, Issue - 12, December-2024
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

**"लोकेऽस्मिन् द्विविधा निष्ठा पुराप्रोक्ता मयानघ।**

**ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥"**[11] इति

कर्मभूमौ योगिनः क्रियायोगः अथवा अष्टाङ्गयोगानुष्ठानेन असम्प्रज्ञातसमाधिसिद्धफलं कैवल्यप्राप्नुवन्ति। अन्तिमपुरुषार्थो मोक्ष एव सर्वेषामभिलक्ष्यम्। महर्षिपतञ्जलिप्रणीतं योगशाखं मानवजीवनस्य शृङ्खलविधानस्य वैशिष्ट्यमाधत्ते। शब्दादिविषयेषु सर्वदानुरक्तानामिन्द्रियाणां बहिर्वृत्तिः कथमन्तर्मुखी भवेदित्ययमेव योगददर्शनस्य मुख्या भिप्रायः। अतएव सूत्रकारेण प्रथमसूत्रे **'अथ योगानुशासनमिति'**[12] प्रतिज्ञां विधायानन्तरं **'योगश्चित्तवृत्तिनिरोधः**[13] इति सूत्रं व्यधायि। योगमार्गावलम्बनेन विषयवासनाकषायितस्य चित्तस्य सर्वथा बहिर्मुखीवृत्तयः निरूद्धा भवन्ति[14], येन मानवस्य सर्वाण्यपीन्द्रियाणिवशमागच्छन्ति, मोक्षमार्गश्च निष्कण्टको भवति। तस्मात् सर्वादौ शरीरांगेन्द्रियाणां, चित्तस्य च निरोध अत्यावश्यक इति सर्वशास्त्राणि सडिण्डिममुद्धोषयन्ति । कठश्रुतिः रथि सारथि दृष्टान्तेन व्यधायि -

**"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥"**

**"इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचरान्।**

**आत्मेन्द्रियमनो युक्तं भोक्तेत्याहुर्मनीषिणः॥"**[15]

आधुनिकयुगे मानसिकभाराक्रान्तमानवाः मधुमेयादिनानाविधरोगेण निपीडिताः भवन्ति । यद्वारा असुस्थताजनितं निरानन्दं सर्वदानुभवन्ति । एतदर्थं आधुनिकचिकित्सकाः

[11] श्री.भ.गी.३.३
[12] बी.मु.१/१
[13] तत्र--१/२
[14] कठ.उप.२.१.१
[15] कठ.उप.१.३.३

Volume – 2, Issue - 12, December-2024
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

मानसिकभारसाम्यजनितमधुमेयादिरोगस्य निराकरणार्थं योगासनादिव्यायामस्योपदेशं प्रयच्छन्ति। तस्मादभीष्टनिरामयस्यावश्यकता परिपूरयितुं कामः योगशास्त्रोक्तयोगसाधनप्रक्रिया अनिवार्या इत्युच्यते। महर्षिपतञ्जलिप्रणितयोगशास्त्रे पादचतुष्टयाः सन्ति। प्रथमपादेन तेन 'योगश्चित्तवृत्तिनिरोधः' इत्यनेन सूत्रेण योगलक्षणं व्याख्यातम्, तदनन्तरं समाधिरूपः सम्प्रज्ञातोक्तः। द्वितीयपादे **'तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'**[16] इत्यनेन वहिरङ्गसाधनानि क्रियायोगाख्यानि यमादीनि प्रतिपादितानि। तृतीयपादे-**'देशबन्धश्चित्तस्य धारणा'**[17] अनेन धारणाध्यानसमाध्यात्मकस्यान्तरङ्गस्य साधनप्रक्रियाः प्रतिपादिताः। चतुर्थपादे- **'जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः'**[18] अनेन सिद्धिप्रपञ्चनपुरःसरं परमं प्रयोजनं कैवल्यं प्रपञ्चितम्।

योगदर्शनं सांख्यदर्शनेन साकं तत्त्वविचारदृष्ट्या अभिन्नता भजते। सांख्योक्तानि प्रकृत्यादिपञ्चविंशतितत्त्वानि प्रत्यक्षानुमानागमप्रमाणान्यप्यत्र स्वीकृतानि। सुखदुःखमोहात्मकं जगदिदं प्रकृतेः परिणामभूतमिति तेप्यङ्गीकुर्वन्ति। जगच्चिते प्रतिभासते अतः चित्तं विहाय नास्य जगतः पृथक् सत्तास्तीत्याकारकं बौद्धादीनां मतम्, आत्मातिरिक्तस्य जगतः सत्तामनङ्गीकुर्वतां जगन्मिथ्यात्ववादिनामद्वैतवेदान्तिनामपि यन्मतं, सर्वाणि तानि खण्डितवान् योगदर्शनम्। यदुक्तं पतञ्जलिना द्वाभ्यां सूत्राभ्यां **'वस्तुसाम्ये चित्तभेदात् तयोर्विभक्तः पन्था'**[19] **'न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्'**[20] इति। प्रतिशरीरं पुरुषभेदतो यत्सांख्यशास्त्रोक्तं पुरुषवहुत्वं योगाचार्या अपि अङ्गीकुर्वन्ति। जीवाः स्व स्व कर्मानुसारं जन्मजरामरणदुःखजाले निबद्धाः सन्तः

---

[16] यो.सू.२/१

[17] तत्र-३/१

[18] तत्र-४/१

[19] योग.सू.४.१५

[20] यो.सू.४.१६

अविद्याऽस्मितारागद्वेषाभिनिवेशाख्यान् क्लेशान्मुञ्चन्ति। यदा तु चित्तवृत्तेर्निरोधो भवति तदा ते क्लेशा अकिञ्चित्करा दग्धबीजोपमा भवन्ति, न तेषु पुनरंकुरोगमः सम्भाव्यते। तदानीं प्रारब्धं सञ्चितं क्रियमाणं चेति कर्मत्रयाणां प्रवाहोऽवरुद्धो भवति। चित्तवृत्तेः निरोधस्य वैकल्पिकोपाय ईश्वरप्रणिधानमिति योगशास्त्रे निर्दिष्टम्। भगवतः परमेश्वरस्यारधनया जीवाः संसारसागरादुत्तीर्णाः भवन्ति। **"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वर:"**[21] इति ईश्वरस्वरूपं योगदर्शने प्रतिपादितम् । **'स तु सर्वज्ञः'**[22], **'सर्वशक्तिमान् सर्वनियन्ता श्रुतिप्रतिपादितः पुराणपुरुषः परमया करुणया तदाश्रिताननुगृह्णाति'**[23] । **'ईश्वरप्रणिधानार्थं श्रुतिस्मृत्युक्तपरमेश्वरवाचकस्य प्रणवस्य'**[24] **जपः करणीयः।'**[25] भागवतादीनि शास्त्राण्याश्रित्येश्वरस्वरूपचिन्तनं तदुपासनं च करणीयम्। येन च भगवतः कृपापात्रतामासादयेत् जीवः, मोक्षं चाधिगच्छेत्। मोक्षावस्थायां जीवस्यात्यन्तिकी दुःखनिवृत्तिर्भवति, तदनन्तरं स्वस्वरूपमेवाधिगच्छति इति क्रमशः क्रियायोगादारभ्य समाधिं यावत् अनुष्ठानानि अनुष्ठेयानि । इदं योगशास्त्रं चिकित्साशास्त्रवत् चतुर्व्यूहात्मकम् । उक्तं च-यथा चिकित्साशास्त्रं रोगो रोगहेतुरारोग्यं भेषजमिति चतुर्व्यूहैः भिद्यते, तथेदं संसारः, संसारहेतुः, मोक्षो, मोक्षोपायश्च कल्पनीयम्। तत्र दुःखमयः संसारो हेयः, प्रधानपुरुषयोः संयोगो हेयहेतुः तस्यात्यन्तिकी निवृत्तिनिम्, तदुपायः **'सम्यग्दर्शनम्'**[26] इति।

---

[21] योग.सू.१.२४
[22] तत्र निरतिशय सर्वज्ञवीजम् (यो.मू.१.२५)
[23] स.द.सं.पू. ६५३
[24] तस्य वाचकः प्रणवः (यो.सू.१.२७)
[25] तज्जपस्तदर्थभावनम् (यो.सू.१.२८)
[26] स.द.स.पू. ७३९

Sudarshan Research Journal
Volume – 2, Issue - 12, December-2024
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

स्मृतिशास्त्रकारेण महर्षिमनुनाऽपि प्रतिपादितम्-

**"सम्यक् दर्शनसम्पन्नः कर्मभिः न निबध्यते।**

**दर्शनेन विहिनस्तु संसारः प्रतिपद्यते॥"** इति

योगदर्शनस्य वैशिष्ट्यमेवं प्रकारेणानुभूय तं प्रति आकृष्टाः भवन्ति जनाः। सर्वेषामभिलक्ष्यं तु निरामयजीवनयापनम्। यत्तु विना भेषजं योगमार्गसंसाधनेन साध्यते ।

**।। इति शम् ।।**

## परिशीलितग्रन्थसूची –

I. कठोपनिषद् । गीताप्रेस । गोरक्षपुर ।

II. श्रीमद्भगवद्गीता । गीताप्रेस । गोरक्षपुर । 2005 ।

III. श्रीमन्याधवाचार्यकृतः । सर्वदर्शनसंग्रहः । सपरिशिष्ट प्रकाश हिन्दिभाष्योपेतः । भाष्यकारः – डां.उमाशङ्करशर्मा ऋषि । चौखम्वा विद्याभवन , वाराणसी ।

IV. श्वेताश्वेतरोपनिषद् । गीताप्रेस । गोरक्षपुर ।

V. महर्षिपतञ्जलिकृतः । योगसूत्रम् । चौ.सं.सं. वाराणासी , वि.सं. – 1989 ।

VI. सतीशचन्द्र चट्टोपाध्याय, श्रीधीरेन्द्रमोहन दत्तकृतः । भारतीयदर्शनम् । व्याख्याकारः श्रीहरिमोहन झा, श्रीनित्यानन्द मिश्र । संस्कृत भाण्डार । पठना ।

VII. मनुस्मृति । मणिप्रभा हिन्दिटीकासहिता । टीकाकारः पण्डित श्री हरगोविन्द शास्त्री । प्रबन्धलेखक श्रीमान् आचार्य वदरीनाथ वर्मा । चौखम्वा संस्कृत सीरिज । वाराणसी ।

VIII. योगदर्शनम् । सम्पा. राजपालसिंहशास्त्री । मादुर प्रकाशन् , दिल्ली ।